# तृतीयं प्रकरणम्

## राज्यौगादि निरूपणम् -

जैमिनि सूत्रस्य तृतीय अध्यायस्य प्रथम पादे विविधानां राज्यौगादीनां तत्र धनिक, दरिद्र, बन्धन, सुख, दुखादिक यौगानां विवेचनं कृतमस्ति । विविध यौग ज्ञाने द्वादश राशि चक्रमधिकृत्य सूर्यादि ग्रहाणां, पाप पुण्य कारक मारक ज्ञानस्या वश्यकत्वात्वमतश्च तस्याध्यायस्यात्रैव सन्निवेशः कृतः । एते यौगाः फलित शास्त्रे प्राचीन तमाः सन्ति । यत्र ग्रहाणामाश्रय दलाकृति यौगेन यौगानां वर्णनं विद्यते । अस्मिन् पादे सुप्रसिद्धानां गजकेसरि प्रभृतिकानां राज्यौगादिक फल प्रतिपादकानां यौगानां वर्णनं दृश्यते । अस्मिन् पादे दरिद्र श्रीमन्त यौगादीनामपि चर्चा दृश्यते । यौगानुयौगेन धन प्राप्ति यौगानां विन्यासो पि चर्चितं दृश्यते । जीवानां सुख दुःख निरूपणं सुख दुःख ज्ञान विधिः अपि चर्चितं दृश्यते । ~~जीवानां सुख दुःख निरूपणं~~ तथा च ग्रहाणां कारक ज्ञान पुरः सरं विवाह काल ज्ञान पुत्र कन्या विचारस्य भ्रातृ भगिनी विचारादिकस्य मृत्यु काल जल, प्रसव, पुष्कल, लाभादिक ज्ञान प्रकारस्य ऋणास्य, ऋण मुक्तस्य वा ज्ञानस्य पीड़ा सौख्य शीतल रोग कर्मोदय, व्यय ज्ञानस्य च प्रकीर्णात्मिकं वर्णनमुपलभ्यते ।

### राज्यौगादि ज्ञान प्रकारः :

महर्षि जैमिनिना राशिभावादीनांच यौगेन व्यक्ति विशेषस्य कृते न केवलं राज्यौग शब्देन महैश्वर्यादि प्राप्ति वर्णनं विहितमपि । तु मूक बधिर पंगु विकलांगान्धहीन रोगाक्रान्त यौगादि कथन पुरः सरमनेकानां दरिद्रयौगानामपि

विशदं निरूपणं दृश्यते । निरूपणा प्रकारश्चात्रद्भुतः । शैली चापि विचित्रा सैवमैवानु सृता सर्वैर्प्राचीनैश्चा ।

इदमेव तत्वमत्र फल कथने । ग्रहाणां योगायोगैनैव पुरुषादिकस्य भावि फल विचारो त्रोप लभ्यते । तैस्तैर्योगायोगैरयं पुरुषो स्त्री वा कास्मिन् समये भाग्योदयमुप यास्यति । शरीर सौख्यं पूर्णं न वेति । विकलांगोऽन्धो दीनो वांभ्यस्य । मूकत्वं वधिरत्वंच कीदृशं पूर्णमपूर्णं वेति । अयं राजा दरिद्रो वा पण्डितो मूर्खो वा दुर्बलः सबलो वेति विविध प्रकारेण निरूपणमत्र दृश्यते । एभियोगैरेव मातृ पितृ पुत्र जाया भृत्यादिकस्य सुखमपि निर्दिष्टम् । कदा चैषां सम्बन्धिनां मृत्यु योगः सो पि योगैरेव प्रवर्तितः ।

कीदृशी चास्याजीविकेति सापि ग्रह योगमधिकृत्य वर्णितं वर्त्ते । अतश्च विलक्षणोऽयं ग्रह्योग विज्ञान प्रकारः । अयं प्रकारः एवास्य ज्योतिर्विज्ञानस्य मूलम् ।

तत्र मेषलग्नम् -

मेषराशौ भौमो ष्टमेशो ष्ट मेशो पि नाशुभ प्रदो लग्नेशत्वात् । रवि गुरु शुभौ । अत्र विशेषः गुरु शनि योगे । न योग कारकत्वमस्तीति । शनि बुध शुक्राः पापा ज्ञेयाः । शुक्रस्य द्वितीय सप्तमाधि पतित्वान्मारकत्वम् । शुक्रेण सह सम्बन्धत्वे शनि बुधौ अपि मारकौ भवितुर्महतः ।

वृष लग्नम् गुरु शुक्र चन्द्राः पापाः शनि सूर्यौ शुभौ बुधो स्य शुभ प्रदः गुरु शुक्र चन्द्र भौमा मारकाः सन्ति । शनैरत्र राजयोगकारकत्वं विद्यते ।

राज्योगानां निर्दोषाणां लग्नत्रये कर्तुं शक्यते । जन्म लग्ने, कारकांश लग्ने वेति । बलाबलमपि योगस्यात्म कारक पुत्र कारकयोस्तथा लग्नेश पंचमयोः परस्परं सम्बन्धानु सार मूह्यते । तथा हि- लग्नेशः पंचम स्थाने पंचमेशश्च लग्ने च स्यातामथ वात्मकारक पुत्रकारक बुभावपि लग्ने पंचमे स्वोच्चस्थौ स्वांशस्थौ शुभग्रह दृष्टौ भवेतान्तदा महाराज नामको योगो भवति —

"उच्च नीच स्वांशवती- तादृश दृष्टिश्च शुभ मातृ दृष्टे यदि महाराजः ।"[१] अत्र नरः स्यातः सुखी च भवति । नवमेशात्मकारकौ लग्ने पंचमे सप्तमे वा शुभ ग्रह दृष्टौ स्थितौ भवेतान्तदा जातको राजा भवति । - "जन्मकाल घटिकास्वैक दृष्टासु राजानः ।"[२]

अथवा आत्मकारकांशात् लग्नेशाद्वा तृतीये षष्ठमे पापग्रह युते दृष्टे वाऽपि राजा भवति । पाप शुभ ग्रह मिश्र संयोगे केवलं धनी भवति । नवमेश आत्मकारकश्च द्वावेव लग्ने पंचमे सप्तमे वा शुभग्रह युतौ दृष्टौ वा भवेतान्तदापि राजयोगः प्रोक्तः । लग्नेशात्मकारकाच्च द्वितीये चतुर्थे पंचमे च शुभ ग्रह योगे जातको राजा भवति । एवमेव तृतीये षष्ठे च पापग्रह योगे सत्यपि राजा भवति । मिश्र ग्रहैस्तु केवलं धनी भवति ।

कारके ततः पंचमे वा लग्ने लग्न पदे वा गुरु चन्द्र दृष्टे युते वा शुक्रे सति राजयोगी भवति ।

यद्येक ग्रहो जन्मलग्न होरा लग्नं घटीलग्नं च पश्यति तदापि महान राजयोगो भवति । यदि सूर्यादियोग्रहा: स्वस्था: स्वांशस्था: द्रेष्काणस्था वा लग्नं सप्तमंच पश्येयुस्तदापि राजयोग प्रदा भवन्ति ।

यान योग:

यदि दशमेशश्च नवमस्थ: स्यात्तथा नवमेशश्च दशमस्थो भवेदथवा द्वावेवैकस्थो भवेतामथ वा परस्परं दृष्टौ वान्यतर दृष्टि सम्बन्ध युक्तौ वा स्यातान्तदापि महान् राजयोग: ।

एतौ द्वौ पारिजातवर्गगो भवेतान्तर्हि राज लोकानु शिक्षको भवति । उत्तम वर्गगो स्यातान्तर्हि राजा हास्ति घोटक रथादि युतो भवति । गोपुर वर्गगो चेत्तर्हि राजा अन्य राजमण्डपूजित चरण कमलो भवति । सिंहासन वर्गगो यदि तदा सर्व पृथ्वी पालकश्चक्रवर्ती राजा भवति ।

युधिष्ठिर शालिवाहन नागार्जुन प्रभृतिकास्तु गोपुर वर्ग यो गजा: समुत्पन्ना: । मन्धादयो राजानस्तु पारावत वर्गजा आसन् । ऐरावत् वर्गजास्तु प्रथमज स्वायम्भुवो मनुर्वभूव । हरिश्चन्द्र बलि वैश्वानरा सिंहान् वर्गजा अभवन् देवलोक वर्गजास्तु भगवतो नारायणस्य सर्वे मत्स्यादिकल्कि पर्यन्ता अवतारा निगदिता: । एतैनैरावतादि वर्गाणामप्युत्तरोत्त- माधिक्यं प्राबल्यमस्य योगस्य दृश्यते इति सुस्पष्टम् ।

## – गज केसरि प्रभृतयो राज्योगाः

नाभसयोग वर्णनान्तरमन्येषामपि बहूनां महत्वपूर्णानां राज्योगानां पराशरेण विवेचनं विहितम् । तत्रादौ गजकेसरि संज्ञको महान योगो निरूप्यते तस्य भेद द्वयमस्ति, 'शनि केतुभ्यां गज तुरागाधीशः'[3] चन्द्राद्यदि बृहस्पति केन्द्रे स्याच्च था गजकेसरी योगः । राज्योगादिक निरूपणे स्मिन् पादे पूर्वं परम्परा पि सुन्दर रूपेण दृश्यते । यद्यपि सर्वस्यास्य प्रकरणस्य चर्चा पूर्वं भागे एव लिखिता ।

'राजयोगेषु सर्वेषु
पैण्ड्यमाह पराशरः'[4]

अनेनेदं सिध्यति यत्पाराशरस्य पूर्वं राज्योगादि वर्णने गर्गस्यापि पूर्णाधिकारः आसीत् । एवंच राज्योगादीनां चर्चा नारदपुराणेऽपि दृश्यते ।

पराशरादुत्तरवर्तिषु ऋषिषु ज्योतिष शास्त्रे जैमिनिरेव मूर्धन्यत्वम् तेन न केवलं राजयोगानामपि तु बन्धादिकानामन्येषामपि योगानां विशदा चर्चा विहिता । जैमिनि सूत्रस्याध्यायद्वये एव सर्वाष्टी टीका वर्तन्ते । परंचावशिष्टाध्याय द्वये राजयोगादिकानां वा महाराज योगानामारम्भे —

'अथ राज जनिताभ्यां योगे योगे लेया मेषाधिपः, उच्च नीच स्वांशवती तादृश दृष्टिश्च शुभमात् दृष्टे यदि महाराजः । लेय लाभयोः परकाले[5] आत्मकारक पुत्राभ्याम् राजयोगं प्रकल्पयेत् । तनुपंचमनाथाभ्यां यथैव द्विज सप्तम् । केन्द्र - पुत्रेशयोर्योगे योगोऽमात्यभिदो भवेत् । कर्मेशस्यतु योगेन राज्य साचित्य तामियात् । इत्यादि ।'[6]

यदि ये राजयोगा कलौ विप्राणां भवेयुस्तदा तेषां राजशासनादिकं न भवति । केवलं ते विप्राः यज्ञ याग कर्म निष्ठाः सन्तः श्रीधनैर्युक्ता भवन्ति । शूद्रादयो म्लेच्छ धर्मिणश्च राजयोगेषु सत्सु राजयोग युक्ताः कलियुगे भवन्ति तथा हि —

शूद्रादयः कलौ राजधर्मिणो म्लेच्छ धर्मिणः ।
विप्राश्चेच्छ्री धनैर्युक्ता यज्ञ कर्म क्रिया रताः ।[७]
अपि तु राजयोगस्य मभिप्रायः ।

मृत्यु योगः :-

*यज्ञ जनेशाभ्याम् स्वकारकाभ्याम् निधनम्*[८] जन्मकुण्डल्यां तृतीयाष्टमौ भावौ मनुष्यस्यायुर्घातकौ । तयोर्व्यय भावौ द्वितीय सप्तमौ भावौ मारक भावमित्यर्थः । आत्मकारकांश लग्नात्तथा जन्मलग्नाच्च ये तृतीय षष्टाष्टम द्वादश द्वितीय सप्तम स्थानाधिपास्ते सर्वे मारका उच्यन्ते । षष्ठाष्टमेशयोर्मध्ये प्रायशः अष्टमेश एव मारकः । परंच षष्ठेशे पाप बाहुल्ये सति स एव मुख्य मारकः । दीर्घायु र्मध्यमायु योगत्वेन मारकत्वं दर्शयति मध्यमायुर्योगे षष्ठात्षष्ठेतराद्वापि त्रिकोण गो ग्रहो मारकः । षष्ठे शाश्रित राशीश दशायामपि मृत्युर्योगः ।

कक्ष्या ह्रास वृद्धि विचारः:- तत्र शनि कक्षा ह्रासः, अत्र यदि शनिरायुर्योग कारकश्चेत्तर्हि कक्ष्या ह्रासो भवति । अर्थात् यदि शनिर्लग्नेशेन होरेशेन वान्वितः स्यादथवा नीचराशिः पापयुतो दृष्टो वा स्यादिति भावः । अन्यथा स्वोच्चस्थः शुभग्रहयुतो दृष्टो वा शनिः कक्षाया वृद्धिकरः। 'शनौ योग हेतौ कक्ष्या ह्रासः' विपरीतमित्यन्ये ।

द्वार बाह्यराशिभ्यां मृत्युर्विचार:- द्वार शब्देन स राशिरत्र गृह्यते । यस्माच्चर स्थिर ब्रह्म ग्रह नवांशादि भेदेन दशारम्भो भवति । कुत्रचित्रलग्नात्कुत्रचित्सप्तमात् कुत्रचित ब्रह्म ग्रहान्नवांशाद्वा दशारम्भो भवति । अत: स लग्न एव द्वार लग्नो यस्माद् दशारम्भो जायते इति भाव: । अस्यैव द्वितीयं नाम पाकराशिरिति ।

दशाश्रयो द्वारम्, ततस्तावतियं बाह्यम्[६] अन्यदपि जन्मलग्नादष्ट मेशो चोच्चस्थे न नवांश दशायां मृत्युरिति । मलिने द्वार बाह्ये नवांशे निधनं द्वार द्वारेशयोश्च मालिन्ये शुभदृग्योयान्न[१०] दशाप्रकरणे स्थिरदशास्वरूपे चर स्थिर द्विस्वभाव राश्यानुसारं सप्ताष्टनव संख्या वर्षाण्युक्तानि । तदनुसारं दशा राशित आरम्य राशित्रय विभाग पूर्वकं खण्ड चतुष्टयम् । अत्र खण्डानुसारं मृत्यु योगमधिकृत्य मरणं ज्ञेयम् । अत्र जैमिनीय सूत्रे टीका कारै: खण्डत्रयं स्वीकृतमस्ति । तदनुसारमे वाल्यमुश्चेत्प्रथमखण्डे मध्यमायुश्चेद् द्वितिय खण्डे दीर्घायु चेत्तर्हि तृतिय खण्डे मरणम् । अत्र मृत्युकारके खण्डे पाप ग्रह मध्यस्थे राशौ लग्नात् कारक लग्नांच पापा क्रान्ते त्रिकोण रुक्ष- राशौ द्वादशे ष्टम् राशौ वा मृत्यु योग: । द्वादशाष्टमेशयो: क्षीण चन्द्र शुक्र दृष्टयो: सतो: तयोर्दशायामपि मरणम् । दशा प्रदराशितो ष्टमेशो यं राशि पश्यति तस्य तथा जन्म लग्नादष्टमेश षष्टेशदृष्टराशेर्दशाया वा मरणमिति।

ग्रहाणां शल रुद्र महेश्वर ब्रह्मेति चतुष्ष भेदमधि कृत्यायुदये मृत्यु विचार:-

लग्न सप्तमायोर्मध्ये यो ग्रहो बली स: शूलग्रह इत्युच्यते । द्वितियाष्ट मेशयोर्मध्ये यो बली स रुद्र: इति उच्यते । अत्र भेदद्वयम् । एतयोर्मध्ये पि य: शुभ दृष्ट: स बलवान रुद्र इति कथ्यते ।

पितृलाभ मावेश प्राणी रूद्रः अप्राण्यपि पाप दृष्टम् । सूत्रद्वयमुपलभ्यते । अत्र शूलस्यापि द्वादश राशीनां दशाराशित आरम्भ्य भेदत्रयमस्ति । प्रथम द्वितीय संज्ञया ।

महेश्वरलक्षणम् -

कारक लग्नादष्टमेशो महेश्वर ग्रहः यथात्म कारकेशः स्वोच्चस्थस्तदात्म कारकादष्टमेश द्वादशे शयोर्मध्ये यो बलवान् सो महेश्वरः । यदि द्वावेव बलिनौ तर्हि द्वावेवाष्टम द्वादशेशाविति महेश्वरौ । यथात्मकारको राहुणा केतुना वा युतश्चेदथवात्म कारकादष्टमस्थो राहुर्केतुर्वास्यात्तदाष्टमेश द्वादशयोर्मध्ये बलवानेव महेश्वरः । कारक लग्नादष्टमस्थो ग्रहो पि महेश्वरः । अथ च कारकादष्टमस्थ सूर्यादि ग्रहेभ्यः षष्ठेशो पि महेश्वरः अथवा कारकात् षष्ठ स्थानगो ग्रहो महेश्वर इति ।

ब्रह्मग्रह लक्षणम् -

लग्न सप्तमयोर्मध्ये यो बली तस्मादष्टमेश षष्ठेश द्वादशे शेषु यो बली सग्रहो लग्ने बलवति तस्य पृष्ठ राशिषु सप्तमे बलवति च तस्य पृष्ठ राशिषु विषम राशौ स्थितो ग्रहो ब्रह्मेति संज्ञकः । यदि शनि राहु केतुषु कश्चिदेको ब्रह्म लक्षणं प्राप्नोति तर्हि स न ब्रह्मेति परंच तेभ्यः षष्ठो ग्रहो ब्रह्मेति कथ्यते । अत्र गणना सूर्यादिग्रह संख्या परिज्ञेया । पूर्वमुक्तं यदि शनि राहु केतूनां ब्रह्मत्वाभावः परंच यथात्म कारकत्वेन स राहोर्यदि ब्रह्मत्वं प्राप्तं भवेत् तर्हि किं कार्यमस्य प्रश्नस्येदमुत्तरं सर्वाधिकांशयुक्तस्यात्म कारकस्यस्थाने न्यूनांश युक्तस्य ग्रहस्य ब्रह्मत्वमित्येकः प्रकारः न्यूनांशश्चेद्राहुः तदा सो पि ब्रह्मा भवितुमर्हति इति । द्वितीय प्रकारः ।

बहूनां योगे स्वजातीयः
राहु योगे विपरीतम् । [११]

इतिसूत्रद्वयस्य व्याख्याने द्वितीय प्रकारस्यैवौचित्यं स्वीकृतम् । तेनेदं स्पष्टं भवति यद्यनेक ग्रहेषु ब्रह्म लक्षणं प्राप्तेषु ग्रहेषु राहोरपि ब्रह्मेति संज्ञा प्राप्ता चेत्तर्हि सो पि ब्रह्मा भवति यदि सर्वेभ्यो न्यूनांश इति स्पष्टम् ।

रिष्ट वर्णनम् -

यस्य जातकस्य पंचमे सूर्य शनि चन्द्र भौमा स्थिता स्युस्तस्य माता भ्राता च मृत्युमाप्नोति । पाप दृष्टो युतो वा शुभ दृष्टि शून्यो भौमो लग्नस्थो भवेचाष्टमस्थः शनिः सूर्यो वा स्यात् तदापि मरणमति शीघ्रमिति भावः । शनौ दशमस्थे चन्द्र षष्ठस्थे भौमे लग्नस्थे च मात्रा सह जातकस्य मृत्युयोगः । शुभ ग्रह दृष्टि शून्ये च सप्तमे लग्ने पापा क्रान्ते क्षीणे चन्द्रयुते लग्ने पापग्रहेषु केन्द्राष्टमस्थेषु च जातस्यैव मरण योगो भवति । पापयुते चन्द्र लग्ने नवमे सप्तमे वा शुभ दृष्टि शून्ये सति शिशोः मृत्यु योगः ।

मरण निमित्त योगः मृत्यौ देशभेद विचारश्च -

क्रान्त राशौ कर्मणि पापे राजाभ्याम् यथासखुवे ।। [१२]

अत्र तृतीये भावे सूर्य दृष्टे युते वा क्लान्विते सति राजहेतोर्मरणं जायते । शनि राहुभ्यां युते दृष्टे वा तृतीय भावे विषकिरणं जलादग्नि पीडनाद्वा मरणं प्रोक्तम् । गर्तादुच्चात्प्रपतनं बन्धनान्मरणं वा वाच्यम् ।

यदि पाप दृष्टौ मातृ पितृ कारकौ सूर्यदृष्टावपि स्यातान्तदा पूर्वोक्त योगौ न भवितुमर्हति । अर्थात् पाप दृष्टावपि सूर्यदृष्टौ पितृकारकौ स्यातान्तदा दश वर्ष पूर्वं न पितृमरणामिति पूर्वयोगस्याऽपवादो ज्ञेयः ।

चन्द्रमान्दी च यदि तृतीयस्थौ षष्ठस्थौ वा स्यातान्तदा कृमिकुष्ठादिना मरणं भवति । गुरुणा दृष्टे युते वा तृतीये शोकादिना मरणं प्रोक्तम् । शुक्रेण दृष्टे युते वा तृतीये प्रमेह रोगादिना मरणं वाच्यम् ।

शुभाशुभ योगेन दृष्ट्या वा तृतीय भावस्यानुरूपं तद्ग्रहरोगानुसारं मरणं ज्ञेयम् । यदि बहु ग्रह युतिर्दृष्टिर्वा तृतीय भावे स्यात्तदा बहुरोगानुसारमपि मरणं वाच्यम् ।

तृतीये भावे शुभ ग्रहश्चेत्तदा शुभ देशे मरणं । पापश्चेत्तदा पाप देशे मरणं । अत्र शुभ शब्देन काश्यादित्तीर्थ ज्ञेयम् । कीकटपापादि शब्देन मगधादि देशस्य विचारो ज्ञेयः । मिश्र महे मिश्रस्थले मृत्युर्भवति । अत्र मिश्रस्थल शब्देन पाप पुण्य तीर्थयोर्मध्यस्थ तीर्थ ज्ञानं कार्यम् । तृतीय भावे गुरु शुक्र योगे ज्ञानपूर्वकं मरणं वाच्यम् । गुरु शुक्रातिरिक्तान्यग्रह योगे अज्ञान पूर्वकं मरणामिति भावः । मिश्र ग्रह योगे फलमपि मिश्रं । अर्थात् गुरु शुक्राभ्यां अन्य ग्रहयोगे सति मरण काले ज्ञानमपि स्यादज्ञानमपि कं ज्ञानाज्ञान पूर्वकं मरणामिति स्पष्टम् । यदि लग्न षष्ठ भावयोर्मध्ये शनि राहु केतवः स्युस्तदा मातुः संस्कारं जातको न कर्तुमर्हति । अथ च सप्तम् द्वादश भावयोर्मध्ये शनि राहु केतवो भवेयुस्तदा पितुः संस्कारं कर्तुं न शक्नोतीति भावः ।

जत्र राशौ च क्रमात् सूर्ये ज्वरेण चन्द्रेश्लेष्मणा, भौमे चाति सारेण ।

मातुररिष्ट योगा :-

चन्द्रो यदि पापग्रह त्रयेण दृष्ट: स्यात्तदा मातृनाश योग: । अन्यथा शुभ ग्रहैर्दृष्टश्चन्द्रश्चेत्तदा मातु: शुभफल प्रद: । द्वितीये राहु बुध शुक्र शनि सूर्ययुते सति पितृमरणानन्तरं जातकस्य जन्म तथा मातुश्चापि मरण योग: । पाप ग्रहात् सप्तस्थे वा चन्द्रे पाप युते बलवत्पापग्रह दृष्टे च सति मातृनाश योग: । उच्चस्थे नीचस्थे वा सप्तमस्थे सूर्ये जातको मातृदुग्ध रहितो जा दुग्धेन जीवति ।

चरदशा नियमा :-

इयं दशा लग्नमारभ्य द्वादश भावानायायु वर्णानुरूपं प्रोक्ता । अथ चात्र यदि दशा प्रदराशितो ष्टम पंचम नवम भावेषु पापग्रहश्चेत्तदा सा दशा दु:ख प्रदा ज्ञेया । यदि च तृतीय षष्ठम् भावगत: पापग्रह: स्यात्तदा तद्दशायांजय सुखादिकं वाच्यम् । अथ चात्र तृतीय षष्ठम भावगत: शुभग्रहो भवेत्तदा पराजयादिकमशुभं प्रोक्तम् । दशा प्रद राशित: एकादश भावगत: पाप: शुभो वा ग्रह: स्यात्तदा तु शुभमेव फलम् ।

चरदशाया शुभ: केतु: [१२]

बुध शुक्र केतु गुरवो प्युत्तरोत्तरं शुभा: । महर्षि जैमिनिना केवलं केतो रेव शुभत्वं स्वीकृतम् ।

आधान लग्न विचारः -

आधान लग्नस्यापि विचारो ज्योतिष शास्त्रे महत्वपूर्ण रीत्या प्रतिपादितो वर्तते । परंच गर्भाधान समयो ज्ञातुं न शक्यते । समय ज्ञाना भावाच्च आधान लग्नस्य स्पष्टादिकं न भवितुमर्हति । अतश्चात्र ग्रन्थकारेण जन्मलग्नादेव गर्भाधान लग्नस्यानयन प्रकारो दर्शितः ।

जन्म लग्ने यत्र सूर्यः स्थितो भवेत्तस्माद् भावान्मादै भाव पर्यन्तं यदन्तरं भवेत्तदेकत्र संस्थाप्यम् । तत्र लग्न- नवम भावयोर्यदन्तरं वत्तं संयोज्य लब्धराश्यादिका- नुसारं जन्मलग्नात्पूर्वं निषेक लग्नस्य मासादिकं ज्ञेयम् । ततश्च जन्मलग्नस्य भोग्यांशादिकं चन्द्रस्य भुक्तांशादिके संयोज्यम् । तत्कालानुसारं पूर्वोक्त जन्म लग्न- प्रक्रियावच्च निषेक लग्नं संशोध्यम् । तच्चाधान लग्नस्य स्फुटादिकं भवति ।

आधान लग्नफल कथनम् :-

आधान लग्नस्य यदि ज्ञानं जन्मकालात्पूर्वमेव भवति तदा तस्य स्पष्टादिकं कृत्वा गर्भस्थस्य जीवस्य शुभाशुभ ज्ञानं जातक फलानुसारं वाच्यम् । जन्मानन्तरं निषेक लग्नानुसारमपि माता पित्रोर्जीवन मरणादिकस्य ज्ञानादिकं शुभा शुभ फलं च ज्ञातुं शक्यते । अस्यैव आधान लग्नस्य शुभाशुभ फलस्य पल्लवनं जातक, पारिजात आदि ग्रन्थेषु विस्तरेण दृश्यते । परंच तत्र जन्मलग्नान्निषेक लग्नानयन प्रकार चर्चाया अभावः । यदा उपचयगौ रवि शुक्रौ बलिनौ पुंसः स्वांशकं प्राप्तं भवति तदा युवतेः कुज चन्द्रौ गर्भ संभवौ भवति । भौम बलेन शोणितोपचयात्

पुष्टया प्रादुर्भाव इति चन्द्रस्य स्त्री ग्रहत्वाच्चन्द्रबलं स्त्रीणामुपयुज्यते । एवं स्त्री पुंसो: प्राबल्यात् शुक्र शोणित सन्निपाते हि गर्भ ग्रहणं भवतीति ज्ञेयम् ।

स्वांशोपपय संस्थिते: शुक्राकि भौम राशिभि: धर्मोदयात्मजस्थे बलवति गर्भस्य संभवो भवति । लग्नस्थो वा सुतस्थो वा धर्मस्थो वा यदि गुरु बलि: स्यात् तदा माता गर्भ धारयति ।

गर्भपतना पतन योग: -

निषेक काले विलग्न संस्थो यदा रुधिर मन्दो तद्गृह गते थ वेन्दो तदीक्षते पतति गर्भ: । व्ययगैडर्के शशिनि कृशे पाताले लोहिते सगर्भा स्त्री । म्रियते तास्मिन्नथवा शुक्रे पापद्वयान्त:स्थे । चन्द्र चतुर्थे: क्रूरैर्विलग्नतो वा विपद्यते गर्भ: । होराष्टमे दिति सुते म्रियते सगर्भ सह जनन्या । मास लक्षण संयुक्तो गर्भ: सुखमवाप्नुयात् । उननाधिकगुणो गर्भ: सर्वदा दु:खमवाप्नुयात् ।। मासाधिपो यस्य रिक्तो नीचो, वास्तंगतोऽपि वा । तस्या: गर्भक्षयं याति ।

नपुंसक योग: -

यत्र पुरुष योग संभव: स्त्रीयोग संभवश्च तुल्यो दृश्यते तदा तत्रैव योग कर्तृग्रहाणां बलाधिक्यं तस्यैव निश्चयो वक्तव्या इति । जायास्थाने लस्थे मिश्रं च हिबुके तद्वा नपुंसको भवेत् ।

मेषादि गणनया यावत् संख्ये द्वादशांशे शीतरश्मिर्यदा स्थित: । तत्संख्यो यतस्तो राशिर्जैन्मैन्दो तद् गते भवेत् ।

अथ चन्द्र द्वादशांश प्रमाणेन २ अं ३० कलात्मकेन १५० सकलश्चन्द्र राशिरष्टादश शत्-कला १८०० लभ्यते तदा भुक्त द्वादश कला प्रमाणे किमित्यनुपात लब्धं चन्द्र राशि भुक्तं कलात्मकं ज्ञेयम् । ततोष्ट शतकला कल्पनया चन्द्र नक्षत्रं ज्ञेयमिति विशेषः । अन्ये तु तत्कालेन्दुना यावत्संख्यो द्वादश भाग अधिष्ठितस्तावत्संख्या राशिस्थे चन्द्रे सति प्रसवकाले प्रसवो वक्तव्यः । केतु शनिभ्यां जनने तस्य वर्णं रक्तप्रदरो भवति । शनौ पात योगे कृष्णवर्णो भवति । शनि शुक्राभ्यां श्याम वर्णो भवति । गुरु शनिभ्यां गौर वर्णो भवति । शनि बुधाभ्यां नीलवर्णः, शनिकुजाभ्यां रक्तवर्णः , शनि चन्द्राभ्यां श्वेत वर्णो भवति गौर नीलादिनिस्वांश वशात् । चार पाप दृग् योगे पुत्र नाशः । शुक्र दृग्योगे पुत्र लाभश्च । यदि शुभपाप योच्च अर्द्ध स्थिरयोः स्यात् तत्र नेत्र विकृतोष्ट, नासिकारोग, मुख कर्ण, केश दन्तपटल पादांगहीन कुब्ज वधिर मूलांगोपांग सुशीर केशावर्त चक्र बीज विपर्यास कुनखी वृषणोन्नत । वृहन्नाभि नेत्रपार्श्व दृष्ट्योः रन्ध्र कुब्ज वामन सत्वस्वर नीचस्वर हीनस्वर इत्यादिषु अपि पितृ मात्रोर्वलानि ।

--

## सन्दर्भ- सूची (३)

१- जैमिनीय सूत्राणि- श्री सुशीलकुमार कार ३।१।१-७;८-३०,पृ० ३

अ- लग्न वृश्चिक- भौम-गुरु मकरेस्थित: ।

ब- लग्न वृश्चिक- भौम-गुरु कर्के स्थित: ।

क- लग्न धन- भौम-गुरु मकरेस्थित: ।

ड०- लग्न धन- भौम- गुरु कर्के स्थित: ।

य- लग्न वृषभ:- बुध-शुक्र: कन्याराशिस्थ: ।

र- लग्न वृषभ: - बुध-शुक्र: मीने स्थित: ।

ल- लग्न मिथुन:- बुध-शुक्र: कन्याराशिस्थ: ।

व- लग्न मिथुन:- बुध- शुक्र: मीने स्थित: ।

२- जैमिनीय सूत्रम्- नीलकण्ठ १।३।२४

३- जैमिनीय सूत्राणि- ३।१।६ पृ०-९

४- बृहत्पाराशरी उत्तरार्ध १२।२१

५- जैमिनीय सूत्राणि- ३।१।३

६- बृहत्पाराशरी- पूर्वार्ध २६।४, २८।३८

७- -तत्रैव- ४।४१

८- जैमिनीय सूत्राणि ३।२।१ पृ० १५-१६

९- जैमिनीय सूत्राणि २।३।१-३

१०- -तत्रैव- २।१।१५

११- -तत्रैव- २।१।४९-५०

१२- -तत्रैव- ३।३।३,पृ० ५०

१३- -तत्रैव- २।३।२९

१४- -तत्रैव- ४।४।१

१५- -तत्रैव- १।३।२४

---